**<u>रुधादिगणः</u>**

रुधादिगणे २५ धातवः सन्ति; ते च सर्वे हलन्ताः | कर्त्रर्थे सार्वधातुकप्रत्यये परे किं किं भवति इति अस्मिन् पाठे वीक्ष्यते | सार्वधातुकप्रकरणे इदम् अस्माकम् अन्तिमं कार्यम् |

यथा सर्वेषु गणेषु, कर्त्रर्थके सार्वधातुकप्रत्यये परे, **कर्तरि शप्** (३.१.६८) इत्यनेन शप् विहितः अस्ति | तदा रुधादिगणे **रुधादिभ्यः श्नम्** (३.१.७८) इत्यनेन शपं प्रबाध्य श्नम्–विकरणप्रत्ययः विहितो भवति |

**रुधादिभ्यः श्नम्** (३.१.७८) = रुधादिगणे पठितेभ्यः धातुभ्यः श्नम्–प्रत्ययो भवति, कर्त्रर्थके सार्वधातुकप्रत्यये परे | रुध् आदिः येषां ते रुधादयः, तेभ्यः रुधादिभ्यः | रुधादिभ्यः पञ्चम्यन्तं, श्नम् प्रथमान्तं, द्विपदमिदं सूत्रम् | **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः, **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **प्रत्ययः** (३.१.१) इत्यस्य अधिकारः; अनेन श्नम् इत्यस्य प्रत्ययसंज्ञा भवति | अनुवृत्ति–सहितसूत्रम्— **रुधादिभ्यः श्नम् प्रत्ययः कर्तरि सार्वधातुके** |

श्नम् इति प्रत्यये **लशक्वतद्धिते** (१.३.८) इत्यनेन शकारस्य इत्–संज्ञा, **हलन्त्यम्** (१.३.३) इत्यनेन मकारस्य इत्–संज्ञा; **तस्य लोपः** (१.३.९) इत्यनेन द्वयोर्लोपे सति 'न' इत्येव अवशिष्यते |

सार्वधातुकलकारेषु तिङन्तपदस्य निर्माणार्थं त्रीणि सोपानानि सन्ति—
१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा धातु–विकरणप्रत्यययोः मेलनम्
२. तिङ्प्रत्यय–सिद्धिः
३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्

१. <u>विकरणप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा धातु–विकरणप्रत्यययोः मेलनम्</u>

अस्मिन् प्रथमे सोपाने, रुधादिगणे वस्तुतः क्रमः विपरीतः | सर्वप्रथमं धातु–विकरणप्रत्यययोः मेलनं भवति, तदा एव विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम् |

धातु–विकरणप्रत्यययोः मेलनम्—

श्नम् मित् (म् इत यस्य सः) अस्ति, अतः **मिदचोऽन्त्यात्परः** (१.१.४७) इत्यनेन धातोः अच्–वर्णेषु अन्त्यात् परः आयाति | यथा रुध् + श्नम् → रुध् + न → रुनध्; भिद् + न → भिनद्; कृत् + न → कृनत्; तृद् + न → तृनद्; खिद् + न → खिनद्; तृह् + न → तृनह् इत्यादिकम् |

**मिदचोऽन्त्यात्परः** (१.१.४७) = यः मित् अस्ति, सः अच्–वर्णेषु अन्त्यात् परः आयाति, अपि च अयं मित् यस्य वर्ण–समुदायस्य, तस्य अन्तिमावयवो भवति | म् इत् यस्य सः मित्, बहुव्रीहिः | मित् प्रथमान्तम्, अचः षष्ठ्यन्तम्, अन्त्यात् पञ्चम्यन्तम्, परः प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **आद्यन्तौ टकितौ** (१.१.४६) इत्यस्मात् **अन्तः** इत्यस्य अनुवृत्तिः | अस्मिन् सूत्रे 'अचः' षष्ठीविभक्तौ; "अचः अन्त्यात्" इत्यस्य अर्थः निर्धारणम्— नाम "सर्वेषु स्वरेषु अन्तिमः, तस्मात्" | अत्र **अचः** एकवचने यतोहि अनेन अच्–जातिः इति इष्टम् | आशयः बहुवचनं, निर्धारण–सप्तमी (बहुषु एकम्) |
**जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्** (१.२.५८) = जाति–आख्यायाम् एकस्मिन् बहुवचनम् अन्यतरस्याम् | एतदर्थं सिद्धान्तकौमुदीकारवृत्तिरस्ति— 'अचः इति निर्धारणे षष्ठी | अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात्' | तर्हि 'अचः' एकवचने चेदपि सार्वत्रिक–बहुवचनार्थकः | इत्थञ्च षष्ठीविभक्तेः अर्थः 'स्थाने' इति न; **षष्ठी स्थानेयोगा** (१.१.४९) इति सामान्यम्, इदं सूत्रं विशेषः | अनुवृत्ति–सहितसूत्रम्— **मित् अचः अन्त्यात् परः अन्तः** |

अनेन सूत्रेण श्नम् "यस्य वर्ण–समुदायस्य, तस्य अन्तिमावयवो भवति", इत्युक्तम् | अस्य अर्थः कः इति स्पष्टं भवति सुबन्तप्रकरणे | ज्ञान–शब्दः बहुवचने 'ज्ञानानि' भवति | ज्ञान + इ [शि–प्रत्ययः, **लशक्वतद्धिते** (१.३.८) इत्यनेन 'इ' अवशिष्यते] → शि–प्रत्ययः सर्वनामस्थानसंज्ञकः अतः **नपुंसकस्य झलचः** (७.१.७२) इत्यनेन झलन्तस्य अजन्तस्य च क्लीबस्य नुम् भवति सर्वनामस्थाने परे; नुम् मित् अतः **मिदचोऽन्त्यात्परः** (१.१.४७) इत्यनेन स च नुम् अच्–वर्णेषु अन्त्यात् परः → ज्ञान + न् + इ

→ नुम्–आगमस्य नकारः अधुना ज्ञान इति अङ्गस्य वर्ण–समुदायस्य अन्तिमावयवः इति कारणेन **सर्वनामस्थाने चासम्बुद्धौ** (६.४.८) इत्यनेन नकारान्ताङ्गस्य उपधायाः दीर्घः सर्वनामस्थाने परे (सम्बोधनस्य एकवचने नास्ति चेत— 'असम्बुद्धौ') → ज्ञानान् + इ → ज्ञानानि | यदि नुम्–आगमस्य नकारः 'ज्ञान' इति अङ्गस्य अन्तिमावयवः नाभविष्यत्, यदि अन्त्यस्य अचः एव अवयवः इति स्वीक्रियेत, तर्हि 'अन्' नान्तः चेदपि अङ्गं नान्तं न इति कारणतः **सर्वनामस्थाने चासम्बुद्धौ** (६.४.८) इत्यनेन अकारस्य दीर्घादेशः च नाभविष्यत् |

(प्रश्नः— अत्रोक्तं 'ज्ञान + इ [शि–प्रत्ययः]' | सुबन्तविषये प्रत्ययाः भवन्ति सु, औ, जस् इत्यादयः | तर्हि प्रथमपुरुषस्य बहुवचने 'जस्' इति प्रत्ययः भवेत्; कथं वा 'शि' इति जातम् ? मूलप्रत्ययाः सु, औ, जस् इति तु सत्यम् | किन्तु अनन्तरं प्रत्ययादेशाः भवन्ति— मूलप्रत्ययानां स्थाने आदेशाः भवन्ति | सुबन्तविषये लिङ्गम् अनुसृत्य, कुत्रचित् प्रातिपदिकस्य अन्तिमवर्णम् अनुसृत्य च आदेशाः भिद्यन्ते | नपुंसकलिङ्गे **जश्शसोः शिः** (७.१.२०) इत्यनेन नपुंसकात् अङ्गात् जस्–स्थाने शि–आदेशः | अनेन नपुंसकलिङ्गे, प्रथमपुरुषस्य बहुवचने इकारः आयाति—वनानि, वारीणि, मधूनि, जगन्ति, कर्माणि, धनूंषि, मनांसि |)

एवं च यदा श्नम्–प्रत्ययः आगतः, तदा विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्—

रुधादिगणे एकमेव विकरणप्रत्यय–निमित्तकम् अङ्गकार्यं भवति, तच्च केवलं यत्र श्नम्–प्रत्ययात् परं धातौ नकारः वर्तते | श्नम्–प्रत्ययात् परं स्थितस्य नकारस्य लोपः, **श्नान्नलोपः** (६.४.२३) इत्येनेन सूत्रेण | यथा इन्ध् + श्नम् → इनन्ध् | 'इनन्ध्' इत्यस्मिन् श्नम्–प्रत्ययात् परे धातौ नकारः वर्तते अतः **श्नान्नलोपः** इत्यनेन श्नम्–प्रत्ययात् उत्तरस्य नकारस्य लोपः, इनन्ध् → इनध् | एवमेव तृन्ह् + श्नम् → तृनन्ह् → तृनह्; अञ्ज् → अनञ्ज् → अनज्; भञ्ज् → भनञ्ज् → भनज्; तञ्ज् → तनञ्ज् → तनज्; उन्द् → उनन्द् → उनद् इत्यादिकम् |

धेयं यत् अङ्गकार्यं नाम प्रत्ययं निमित्तीकृत्य, अङ्गम् उद्दिष्य, यत् कार्यं तद् अङ्गकार्यम् | केवलं प्रत्ययात् प्राक् तदेव अङ्गम् इति न; प्रत्ययं निमित्तीकृत्य यत्र कार्यं भवति, तत्र अङ्गम् | अतः रुधादिगणे यद्यपि विकरणप्रत्ययः धातोः मध्ये उपविशति, तथापि स च धातुः विकरणप्रत्ययस्य कारणेन अङ्गमेव |

**श्नान्नलोपः** (६.४.२३) = श्नम्–प्रत्ययोत्तरस्य नकारस्य लोपो भवति | नस्य लोपो नलोपः, षष्ठीतत्पुरुषः | श्नात् पञ्चम्यन्तं, नलोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहित–सूत्रमेवम्— **श्नात् अङ्गस्य नलोपः** |

२. <u>तिङ्प्रत्यय–सिद्धिः</u>

रुधादिगणे अङ्गम् अनदन्तम्, अतः अनदन्ताङ्गानां कृते ये सिद्ध–तिङ्प्रत्ययाः भवन्ति, ते अत्र प्रयुज्यन्ते |

| <u>परस्मैपदम्</u> | | <u>आत्मनेपदम्</u> |
|---|---|---|
| | <u>लट्–लकारः</u> | |
| **ति** तः अन्ति | | ते आते अते |
| **सि** थः थ | | से आथे ध्वे |
| **मि** वः मः | | ए वहे महे |
| | <u>लोट्–लकारः</u> | |
| **तु**, तात् ताम् अन्तु | | ताम् आताम् अताम् |
| हि, तात् तम् त | | स्व आथाम् ध्वम् |
| **आनि आव आम** | | **ऐ आवहै आमहै** |
| | <u>लङ्–लकारः</u> | |
| **त्** ताम् अन् | | त आताम् अत |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **स्** | तम् | त | | थाः | आथाम् | ध्वम् |
| **अम्** | व | म | | इ | वहि | महि |

<u>विधिलिङ्-लकारः</u>

| | | | | | | |
|---|---|---|---|---|---|---|
| यात् | याताम् | युः | | ईत | ईयाताम् | ईरन् |
| याः | यातम् | यात | | ईथाः | ईयाथाम् | ईध्वम् |
| याम् | याव | याम | | ईय | ईवहि | ईमहि |

<u>प्रत्ययादेशः</u>

क्वचित् विशिष्ट-स्थित्याम् एषु सिद्ध-तिङ्प्रत्ययेषु केचन परिवर्तन्ते। अयं विकारः प्रत्ययादेशः इति उच्यते।

परस्मैपदस्य लोटि—
**हुझल्भ्यो हेर्धिः** (६.४.१०१) = हु-धातुतः झलन्तेभ्यः धातुभ्यश्च हि-प्रत्ययस्य स्थाने धि-आदेशो भवति। **येनविधिस्तदन्तस्य** (१.१.७२) इत्यनेन झलेभ्यः इति विशेषणेन तेभ्यः अङ्गेभ्यः येषाम् अन्ते झल्। हुश्च झलश्च तेषामितरेतरद्वन्द्वो हुझलः, तेभ्यो हुझल्भ्यः। हुझल्भ्यः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, धिः प्रथमान्तं, त्रिपदमिदं सूत्रम्। **अङ्गस्य** (६.४.११) इत्यस्य अधिकारः। अनुवृत्ति-सहितसूत्रम्— **हुझल्भ्यः अङ्गेभ्यः हेः धिः**।

परस्मैपदस्य लङि—
**अपृक्त एकाल् प्रत्ययः** (१.२.४१) = यस्य प्रत्यस्य एकैव अल्, तस्य अपृक्त-संज्ञा भवति। एकश्चासौ अल् एकाल्, कर्मधारयः। अपृक्तः प्रथमान्तम्, एकाल् प्रथमान्तं, प्रत्ययः प्रथमान्तं, त्रिपदमिदं सूत्रम्। सूत्रं स्वयं सम्पूर्णम्— **एकाल् प्रत्ययः अपृक्तः**।

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) = हलन्तात्, दीर्घङ्यन्तात्, दीर्घाबन्तात् च सु-ति-सि इत्येषाम् अपृक्तसंज्ञकस्य हलः लोपः। अनेन प्रथमाविभक्तौ सु इत्यस्य स्-लोपः, लङि प्रथमपुरुषे त्-लोपः, मध्यमपुरुषे स्-लोपश्च। हल् च ङी च आप् च तेषाम् इतरेतरद्वन्द्वः हल्ङ्यापः, तेभ्यः हल्ङ्याब्भ्यः। सुश्च, तिश्च, सिश्च तेषां समाहारद्वन्द्वः, सुतिसि, सुतिसिनः अपृक्तं सुतिस्यपृक्तम्। हल्ङ्याब्भ्यः पञ्चम्यन्तं, दीर्घात् पञ्चम्यन्तं, सुतिस्यपृक्तं प्रथमान्तं, हल् प्रथमान्तम्, अनेकपदमिदं सूत्रम्। **लोपो व्योर्वलि** (६.१.६५) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः; अत्र कर्मणि प्रयोगे **लुप्यते** इति रूपविकारः। अनुवृत्ति-सहितसूत्रम् — **दीर्घात् हल्ङ्याब्भ्यो सुतिसि अपृक्तं हल् लुप्यते**।

३. <u>तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यं, तदा अङ्ग-तिङ्प्रत्यययोः मेलनम्</u>

a) अङ्गकार्यम्
रुधादिगणे तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यम् एकमेव, तच्च सर्वेषु धातुषु प्रवर्तते। अपित्सु सार्वधातुकलकारेषु श्नम्-प्रत्यये स्थितस्य अकारस्य लोपो भवति **श्नसोरल्लोपः** इत्यनेन सूत्रेण। यथा रुनध् + तः → रुन्ध् + तः। भिनद् + तः → भिन्द् + तः। कृनत् + तः → कृन्त् + तः। क्षुनद् + तः → क्षुन्द् + तः। तृनह् + तः → तृन्ह् इत्यादिकम्।

**श्नसोरल्लोपः** (६.४.१११) = श्नम्-प्रत्ययस्य अपि च अस्-धातोः अकारस्य लोपो भवति किति ङिति सार्वधातुके परे। श्नश्च अस् च तयोरितरेतरद्वन्द्वः श्नसौ। **शकन्ध्वादिषु पररूपं वाच्यम्** इति वार्तिकेन पररूपादेशात् न सवर्णदीर्घसन्धिः। श्नसोः षष्ठ्यन्तम्, अल्लोपः प्रथमान्तं, द्विपदमिदं सूत्रम्। **अत उत्सार्वधातुके** (६.४.११०) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः; **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः। **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः। अनुवृत्ति-सहितसूत्रम्— **अङ्गस्य श्नसोः अल्लोपः सार्वधातुके क्ङिति**।

**एङि पररूपम्** (६.१.९४) इत्यनेन अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपादेशो भवति। प्र + एजते → प्रेजते। उप + ओषति → उपोषति। अष्टाध्याय्यां तस्मिन्नेव स्थले वार्तिकमस्ति— **शकन्ध्वादिषु पररूपं वाच्यम्**। शक अन्धुः शकन्धुः। कुल अटा कुलटा। शकन्ध्वादिः आकृतिगणः, अनेन श्नसौ अपि अन्यतमः सदस्यः।

एवं च **श्नसोरल्लोपः** इति सूत्रस्य कारणतः पित्सु प्रत्ययेषु एकं रूपम्, अपित्सु प्रत्ययेषु च अन्यत् रूपम् |
यथा—
१. पित्सु प्रत्ययेषु अकारस्य लोपो न भवति |
रुध् + न + ति → रुणध् + ति
क्षुद् + न + ति → क्षुणद् + ति
रिच् + न + ति → रिणच् + ति
तृद् + न + ति → तृणद् + ति
कृद् + न + ति → कृणद् + ति
तृह् + न + ति → तृणह् + ति

२. अपित्सु प्रत्ययेषु अकारस्य लोपो भवति सर्वत्र |
रुध् + न + तः → रुन्ध् + तः
क्षुद् + न + तः → क्षुन्द् + तः
रिच् + न + तः → रिन्च् + तः
तृद् + न + तः → तृन्द् + तः
कृद् + न + तः → कृन्द् + तः
तृह् + न + तः → तृन्ह् + तः

धेयं यत् पित्सु प्रत्ययेषु णत्वं भवति यत्र निमित्तं वर्तते | अपित्सु प्रत्ययेषु निमित्तम् प्रतीयते चेदपि णत्वं नैव भवति | निमित्तं भाति, परन्तु वस्तुतस्तु नास्ति | तत्र **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन णत्वं बाधितम्; अग्रे यत्र सन्धिकार्यं क्रियते, तत्र णत्वं कथं बाधितमिति पश्येम |

अत्र इतोऽपि कश्चन प्रश्नः उदेति— रुधादिगणे अपित्सु तिङ्प्रत्ययेषु सर्वेषाम् अङ्गानां **श्नसोरल्लोपः** (६.४.१११) इत्यनेन नकारोत्तरस्य अकारलोपो भवति, अतः अङ्गस्य उपधायां नकारो भवति | अपि च रुधादिगणे हिसि-धातुम् अतिरिच्य सर्वे धातवः अनिदितः | अतः एषां सर्वेषाम् अनिदितां धातूनाम् अङ्गानाम्, अपित्सु प्रत्ययेषु **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्यनेन, किमर्थं नकारलोपो न स्यात् ?

रुन्ध् + तः, क्षुन्द् + तः, रिन्च् + तः, तृन्द् + तः, कृन्द् + तः, तृन्ह् + तः— एषु सर्वेषु स्थलेषु **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्यनेन अपित्सु प्रत्ययेषु सर्वत्र नकारलोपः भवेत् | किमर्थं न भवति ?

**अनिदितां हल उपधाया क्ङिति** (६.४.२४) = अनिदितां हलन्तानाम् अङ्गानाम् उपधायाः नकारस्य लोपो भवति किति ङिति प्रत्यये परे | इत् इत् अस्ति येषाम् ते इदितः, न इदितः, अनिदितः, बहुव्रीहिगर्भः नञ्तत्पुरुषसमासः, तेषाम् अनिदिताम् | क् च ङ् च तयोः इतरेतरद्वन्द्वः क्ङौ | क्ङौ इतौ यस्य सः क्ङित्, द्वन्द्वगर्भः बहुव्रीहिसमासः, तस्मिन् क्ङिति | अनिदितां षष्ठ्यन्तं, हलः षष्ठ्यन्तम्, उपधाया षष्ठ्यन्तं, क्ङिति सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **श्नान्नलोपः** (६.४.२३) इत्यस्मात् **न**, **लोपः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहित-सूत्रम्— **अनिदितां हलः अङ्गस्य उपधाया न लोपः क्ङिति** |

अत्र च 'इदित्' इत्यनेन कीदृशधातुः गृह्यते इत्यस्य बोधनार्थम् **इदितो नुम् धातोः** इति सूत्रं परिशीलनीयम् | **इदितो नुम् धातोः** (७.१.५८) इत्यनेन इदितः धातोः नुम् आगमो भवति | तर्हि कीदृशानां धातूनाम् इदित्वात् नुम् आगमः इत्यस्य स्पष्टीकरणार्थं काशिकावृत्तौ उच्यते यत् "इरितां समुदायस्येत्संज्ञा (महाभाष्यम् १.२६३) इतीदित्वं नास्ति | अवयवशोऽपीत्संज्ञायां सत्यां **गोः पादान्ते** (७.१.५७) इतोऽन्तग्रहणम् अनुवर्तयितव्यम् | तेनान्तेदितो धातवो गृह्यन्ते |" अनेन 'अन्ते' इत्यस्य अनुवृत्तिः इदित् इत्यस्य अर्थबोधनार्थम् | उपदेशावस्थायां धातोः अन्ते इत्संज्ञक-ह्रस्व-इकारः वर्तते चेदेव 'इदित् धातुः' इत्युच्यते | उपदेशावस्थायां धातोः अन्ते इत्संज्ञक-ह्रस्व-इकारः नास्ति चेत्, स च धातुः इदित् नास्ति | अनेन रुधिर्, विचिर्— एतादृशाः धातवः इदितः न, अपि तु इरितः |

तर्हि रुधादिगणे एषां सर्वेषाम् अनिदितां धातूनाम् अङ्गानाम्, अपित्सु प्रत्ययेषु **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्यनेन,

किमर्थं नकारलोपो न स्यात् ?

उत्तरम् एवं यत् **श्नसोरल्लोपः** (६.४.१११) च **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्याभ्यां यत् कार्यं भवति, तद्द्वयमपि आभीयकार्यम् | अपि च द्वयोः आश्रयः समानः कित्–ङित् प्रत्ययः | अतः **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इति सूत्रं प्रति **श्नसोरल्लोपः** (६.४.१११) इत्यस्य कार्यम् असिद्धम् | **अनिदितां हल उपधाया क्ङिति** (६.४.२४) प्रति यतोहि अकारलोपो न जातः, नकारः उपधायां नास्ति; तस्मात् **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इति सूत्रस्य प्रसक्तिर्नास्ति |

**असिद्धवदत्राभात्** (६.४.२२) = कमपि आश्रयम् अधिकृत्य आभीय–कार्यं, द्वितीयं समानाश्रितम् आभीय–कार्यं प्रति असिद्धं भवति | अधिकारसूत्रम् | **भस्य** (६.४.१२९) इति अधिकारसूत्रेण भ–संज्ञा सम्बद्धकार्याणि भवन्ति षष्ठाध्ययस्य अन्तपर्यन्तम् | **असिद्धवदत्राभात्** (६.४.२२) इत्यनेन ६.४.२३ इत्यस्मात् आरभ्य, **भस्य** इत्यस्य अधिकारस्य अन्तपर्यन्तम् (६.४.१७५), एषां कार्याणां नाम आभीय–कार्यम् | असिद्धवत् अव्ययपदयम्, अत्र अव्ययपदयम्, आ अव्ययपदयं, भात् पञ्चम्यन्तम्, अनेकपदमिदं सूत्रम् | 'असिद्धवत्' इत्युक्ते 'यथा न अजनिष्यत' | सूत्रस्य विधानं जातं, कार्यञ्च सिद्धं; किन्तु अनेन सूत्रेण द्वितीयसूत्रं प्रति प्रथमस्य कार्यं 'यथा नाभविष्यत्' अतः 'असिद्धवत्' इत्युक्तम् | 'समानाश्रितं कार्यम्' इति अर्थः उदेति 'अत्र' इति अव्ययपदेन | अस्मिन् + त्रल् → 'अत्र' | 'अस्मिन्' इत्यस्य सप्तम्यन्ततत्वेन निमित्तत्वम् इति आशयः | सूत्रं स्वयं सम्पूर्णम्— **असिद्धवत् अत्र आ भात्** |

रुनध् + तः → **श्नसोरल्लोपः** (६.४.१११) → रुन्ध् + तः → **असिद्धवदत्राभात्** (६.४.२२) इत्यनेन **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इति सूत्रं प्रति **श्नसोरल्लोपः** (६.४.१११) इत्यस्य कार्यम् असिद्धम् → रुनध् + तः → **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इति सूत्रस्य प्रसक्तिर्नास्ति

b) सन्धिकार्यम्

**– संयोगान्तस्य लोपः** (८.२.२३) = यस्य पदस्य अन्ते संयोगोऽस्ति, तस्य पदस्य अन्तिमवर्णस्य लोपो भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव लोपः न तु पूर्णपदस्य | संयोगः अन्ते अस्ति यस्य तत् संयोगान्तं, बहुव्रीहिः, तस्य संयोगान्तस्य | संयोगान्तस्य षष्ठ्यन्तं, लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **संयोगान्तस्य पदस्य लोपः** |
**– धि च** (८.२.२५) = सकारस्य लोपो भवति धकारादि–प्रत्यये परे | धि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **रात्सस्य** (८.२.२४) इत्यस्मात् **सस्य** इत्यस्य अनुवृत्तिः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **धि च सस्य लोपः** |
**– स्कोः संयोगाद्योरन्ते च** (८.२.२९) = संयोगस्य प्रथमसदस्यः सकारः ककारः वा चेत्, संयोगस्य प्रथमसदस्यलोपो भवति न तु द्वितीयसदस्यस्य, झलि पदान्ते च | स् च क् च तयोरितरेतरद्वन्द्वः स्कौ, तयोः स्कोः | संयोगस्य आदि संयोगादि, तयोः संयोगाद्योः, षष्ठीतत्पुरुषः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **संयोगाद्योः स्कोः लोपः झलि पदस्य अन्ते च** |
**– चोः कुः** (८.२.३०) = चवर्गस्य स्थाने कवर्गादेशो भवति पदान्ते झलि च | चोः षष्ठ्यन्तं, कुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **चोः कुः झलि पदस्य अन्ते च** |
**– व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) = व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज्, छकारान्ताः शकारान्ताः चैषां धातूनाम् अन्तिमवर्णस्य स्थाने षकारादेशो भवति झलि पदान्ते च | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव स्थाने षकारादेशः, न तु पूर्णपदस्य | व्रश्चश्च भ्रस्जश्च सृजश्च मृजश्च यजश्च राजश्च भ्राजश्च छश्च श् च तेषामितरेतरद्वन्दः व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशः, तेषां व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशाम् | व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षष्ठ्यन्तं, षः प्रथमान्तं, द्विपदमिदं सूत्रम् | अत्र '**जच्छशां**' इति भागे **छे च** (६.१.७३) इत्यनेन तुक्–आगमे सति जत्छशां, तदा श्चुत्वसन्धौ जच्छशां | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः झलि पदस्य अन्ते च** |
**– झलां जशोऽन्ते** (८.२.३९) = पदान्ते झलः स्थाने जशादेशो भवति | पदात् परे कोऽपि वर्णः स्यात् वा न वा, सूत्रस्य प्रसक्तिः अस्ति एव | पदात् परे अच् स्यात् हल् स्यात् वा, सूत्रस्य प्रसक्तिः अस्ति एव | बाधकसूत्रम् अस्ति चेत् अन्या वार्ता | झल् प्रत्याहारे

पञ्चमवर्गीय–व्यञ्जनानि वर्जयित्वा सर्वाणि वर्गीयव्यञ्जनानि (नाम अननुनासिक–वर्गीयव्यञ्जनानि), अपि च श्, ष्, स्, ह् | प्रयोगे वर्गाणां प्रथमः, द्वितीयः, तृतीयः, चतुर्थश्च वर्णाः आयान्ति | जश् प्रत्याहारे वर्गाणां तृतीयवर्णाः—ज्, ब्, ग्, ड्, द् इति | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन कवर्गीयाणां स्थाने गकारः, चवर्गीयाणां स्थाने जकारः, तवर्गीयाणां स्थाने दकारः, टवर्गीयाणां स्थाने डकारः, पवर्गीयाणां स्थाने बकारः इति | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, अन्ते सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः || तर्हि पदस्य अन्ते झल्–प्रत्याहारे कश्चन वर्णः अस्ति चेत्, स्थाने तस्य वर्गस्य तृतीयवर्णादेशः भवति | अयं जश्त्वसन्धिः इत्युच्यते | अनुवृत्ति–सहितसूत्रम्— **पदस्य अन्ते झलां जशः** |

**– षढोः कः सि** (८.२.४१) = सकारे परे षकारस्य ढकारस्य च ककारादेशो भवति | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **षढोः कः सि** |

**– नश्चापदान्तस्य झलि** (८.३.२४) = अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति झलि परे | झल्–प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः | पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मो ऽनुस्वारः** (८.३.२३) इत्यस्मात् **मः**, **अनुस्वारः** इत्यनयोः अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अपदान्तस्य मः नः च अनुस्वारः झलि संहितायाम्** |

**– आदेशप्रत्यययोः** (८.३.५९) = इण्–प्रत्याहारात् कवर्गीयात् च परे अपदान्तः आदेशरूपी प्रत्ययावयवो वा सकारः अस्ति चेत्, तस्य सकारस्य स्थाने षकारादेशो भवति | आदेशः तु मूर्धन्यवर्णस्य इत्येव उक्तं, परं **स्थानेऽन्तरतमः** इत्यनेन ट्, ठ्, ड्, ढ्, ण्, ष् इत्येषु मूर्धन्यवर्णेषु षकारस्य नैकट्यम्, अतः षकारः एव आदिष्टः भवति | नुम्, विसर्गः, शृ–प्रत्याहारस्थ–वर्णः एषु अन्यतमः मध्ये अस्ति चेदपि कार्यं भवति | इण्–प्रत्याहरे इमे वर्णाः अन्तर्भूताः— इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह, य, व, र, ल | अस्य कार्यस्य नाम षत्वविधिः | आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इतरेतरद्वन्द्वः | षष्ठ्यन्तम् एकपदमिदं सूत्रम् | **सहे साडः सः** (८.३.५६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **नुंविसर्जनीयशर्व्यवायेऽपि** (८.३.५८) इत्यस्य पूर्णा अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **इण्कोः** (८.३.५७), **अपदान्तस्य मूर्धन्यः** (८.३.५५) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्—**इण्कोः आदेशप्रत्यययोः अपदान्तस्य सः मूर्धन्यः संहितायां, नुंविसर्जनीयशर्व्यवायेऽपि** |

**– रषाभ्यां नो णः समानपदे** (८.४.१) = रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति, समानपदस्थौ चेदेव निमित्तनिमित्तिनौ भवतः |

**– अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) = अट्, कवर्गः, पवर्गः, आङ्, नुम् इत्येतैः यथासम्भवं मिलितैः व्यवधानेऽपि नस्य णः स्यात् समानपे | **रषाभ्यां नो णः समानपदे** (८.४.१) इति सूत्रस्य पूर्णतया अनुवृत्तिः |

**– ष्टुना ष्टुः** (८.४.४१) = दन्त्यसकारस्य तवर्गीयवर्णस्य च स्थाने मूर्धन्यषकारादेशः टवर्गीयवर्णादेशश्च भवतः, मूर्धन्यषकार–टवर्गीयवर्णयोः योजनेन |

**– झलां जश् झशि** (८.४.५३) = झलां स्थाने जशादेशो भवति झशि परे | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन जश्–वर्णेषु वर्णनिर्धारणम् | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, झशि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | झश्–प्रत्याहारे वर्गाणां तृतीयचतुर्थाः च वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **झलां जश् झशि संहितायाम्** |

**– खरि च** (८.४.५५) = झलः स्थाने चरादेशो भवति खरि परे | खरि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः; **अभ्यासे चर्च** इत्यस्मात् **चर्च** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहित–सूत्रमेवम्— **झलां चर् खरि च संहितायाम्** |

**– अनुस्वारस्य ययि परसवर्णः** (८.४.५८) = अनुस्वारस्य स्थाने परसवर्णादेशो भवति ययि परे | परस्य सवर्णः, परसवर्णः, षष्ठी तत्पुरुषः | अनुस्वारस्य षष्ठ्यन्तं, ययि सप्तम्यन्तं, परसवर्णः प्रथमान्तं, त्रिपदमिदं सूत्रम् | यय्–प्रत्याहारे श्, ष्, स्, ह् एतान् वर्जयित्वा सर्वे हल्–वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अनुस्वारस्य ययि परसवर्णः संहितायाम्** |

**– वाऽवसाने** (८.४.५६) = अवसाने झलः विकल्पेन चृ–आदेशो भवति | अनेन अवसानावस्थायां विकल्पेन जश्त्वं चर्त्वं वा | वा अव्ययपदम्, अवसाने सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः | **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चृ** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अवसाने झलां चरो वा** |

**– झरो झरि सवर्णे** (८.४.६५) = हल्–उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे | झरः षष्ठ्यन्तं, झरि सप्तम्यन्तं, सवर्णे सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **हलो यमां यमि लोपः** (८.४.६४) इत्यस्मात् **हलः**, **लोपः** चेत्यनयोः अनुवृत्तिः | **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्मात् **अन्यतरस्याम्** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **हलः झरः लोपः अन्यतरस्यां सवर्णे झरि संहितायाम्** |

भुङ्क्ते, युनक्ति, छिनत्ति, भुनक्ति, इत्यादीनि रूपाणि दृष्ट्वा बहवः जनाः चिन्तयन्ति यत् रुधादिगणः अतीव जटिलः | किन्तु वस्तुस्थितिः तथा न; अयं गणः सरलः यतोहि अङ्गकार्यम् अतीव न्यूनम् |

आहत्य श्नम्–निमित्तीकृत्य एकम् अङ्गकार्यम्— **श्नान्नलोपः** (६.४.२३) इत्यनेन न–लोपः, अपि च तिङ्–निमित्तीकृत्य एकम् अङ्गकार्यम्— **श्नसोरल्लोपः** (६.४.१११) इत्यनेन श्नम् इत्यस्य अकारलोपः | तत्पश्चात् अवशिष्यते केवलं सन्धिकार्यम् |

**1.** चकारान्ताः धातवः (चत्वारः धातवः विचिर् → विच्, तञ्चू → तञ्च्, रिचिर् → रिच्, पृची → पृच्)

विचिर् → विच्–धातुः (उभयपदी, पृथग्भावे = पृथक् करोति, विलक्षयते)

विच् + श्नम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → विनच्

a. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यम्

पित्सु = अङ्गकार्यं नास्ति | विनच् + ति → सन्धिकार्यम् → विनक्ति | विनच् + आनि → विनचानि |
अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः | विनच् + तः → विन्च् + तः → सन्धिकार्यम् → विङ्क्तः

b. सन्धिकार्यम्

विनच् + ति → **चोः कुः** (८.२.३०) → विनक् + ति → वर्णमेलने → विनक्ति
विन्च् + तः → **चोः कुः** (८.२.३०) → विन्क् + तः → **नश्चापदान्तस्य झलि** (८.३.२४) → विंक् + तः → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → विङ्क् + तः → वर्णमेलने → विङ्क्तः
विन्च् + अन्ति → **नश्चापदान्तस्य झलि** (८.३.२४) → विंच् + अन्ति → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → विञ्च् + अन्ति → वर्णमेलने → विञ्चन्ति
विनच् + सि → **चोः कुः** (८.२.३०) → विनक् + सि → **आदेशप्रत्यययोः** (८.३.५९) → विनक् + षि → वर्णमेलने → विनक्षि
विन्च् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → विन्च् + धि → **चोः कुः** (८.२.३०) → विन्क् + धि → **नश्चापदान्तस्य झलि** (८.३.२४) → विंक् + धि → **झलां जश् झशि** (८.४.५३) → विंग् + धि → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → विङ्ग् + धि → वर्णमेलने → विङ्ग्धि

आहत्य अत्र कार्यं कीदृशमिति चेत्—
१) अपिति प्रत्यये परे **श्नसोरल्लोपः** (६.४.१११), **नश्चापदान्तस्य झलि** (८.३.२४), **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इति सूत्रसमूहः |
२) झलि परे **चोः कुः** (८.२.३०) |

अनेन कार्यं चतुर्विधम्—
१) पिति झलि = **चोः कुः** (८.२.३०)
२) पिति अझलि = न किमपि
३) अपिति झलि = सूत्रसमूहः + **चोः कुः** (८.२.३०)
४) अपिति अझलि = सूत्रसमूहः

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —

लोटि—

लङि—

विधिलिङि—

एवमेव—

तञ्चू → तञ्च् (परस्मैपदी, सङ्कोचने = सङ्कुचितः भवति)

रिचिर् → रिच् (उभयपदी, विरेचने = त्यजति, मोचयति, रिक्तं करोति)

पृची → पृच् (परस्मैपदी, सम्पर्के = संयोजयति)

अनयोः द्वयोः धात्वोः प्रसङ्गे णत्वमपि परिशीलनीयं भवति | पिति प्रत्यये परे णत्वं भवति; अपिति प्रत्यये परे णत्वं न भवति | किमर्थमिति अग्रे उच्यते |

रिन्च् + तः → अत्र **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इत्यनेन णत्वं स्यात्, परन्तु अत्र सूत्रद्वयस्य प्रसक्तिरस्ति— **नश्चापदान्तस्य झलि** (८.३.२४), **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) च | त्रिपाद्यां समानकाले सूत्रद्वयस्य प्रसक्तिरस्ति चेत्, **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन परसूत्रम् असिद्धं भवति | अनयोः सूत्रयोर्मध्ये **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) परसूत्रम् अतः अत्र असिद्धं भवति— शास्त्रासिद्धम् इति | **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन नकारस्य स्थाने अनुस्वारः | अनुस्वारे कृते, णत्वस्य प्रसक्तिर्नास्ति |

पृच्–धातोः प्रसङ्गे कार्यं तदेव; एक एव भेदः यत् णत्वविधायकसूत्रं **रषाभ्यां नो णः समानपदे** (८.४.१) |

त्रयाणाम् अपि धातूनां कृते अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>

लटि —

लोटि—

लङि—

विधिलिङि—

**2.** <u>जकारान्ताः धातवः</u> (षड् धातवः युजिर् → युज्, अञ्जू → अञ्ज्, भञ्जो → भञ्ज्, भुज → भुज्, ओविजी → विज्, वृजी → वृज्)

<u>युजिर् → युज्–धातुः</u> (उभयपदी, योगे = संयोजनं करोति)

युज् + श्नम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → युनज्

a. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यम्

पित्सु = अङ्गकार्यं नास्ति | युनज् + ति → सन्धिकार्यम् → युनक्ति | युनज् + आनि → युनजानि |

अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः | युनज् + तः → युन्ज् + तः → सन्धिकार्यम् → युङ्क्तः

b. सन्धिकार्यम्

युनज् + ति → **चोः कुः** (८.२.३०) → युनग् + ति → **खरि च** (८.४.५५) → युनक् + ति → वर्णमेलने → युनक्ति

युन्ज् + तः → **चोः कुः** (८.२.३०) → युन्ग् + तः → **नश्चापदान्तस्य झलि** (८.३.२४) → युंग् + तः → **खरि च** (८.४.५५) → युंक् + तः → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → युङ्क् + तः → वर्णमेलने → युङ्क्तः

युन्ज् + अन्ति → **नश्चापदान्तस्य झलि** (८.३.२४) → युंज् + अन्ति → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → युञ्ज् + अन्ति → वर्णमेलने → युञ्जन्ति
युनज् + सि → **चोः कुः** (८.२.३०) → युनग् + सि → **आदेशप्रत्ययोः** (८.३.५९) → युनग् + षि → **खरि च** (८.४.५५) → युनक् + षि → वर्णमेलने → युनक्षि
युन्ज् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → युन्ज् + धि → **चोः कुः** (८.२.३०) → युन्ग् + धि → **नश्चापदान्तस्य झलि** (८.३.२४) → युंग् + धि → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → युङ्ग् + धि → वर्णमेलने → युङ्ग्धि

**प्रोपाभ्यां युजेरयज्ञपात्रेषु** (१.३.६४) = प्र उप इत्येवं पूर्वात् युजेः अयज्ञपात्रविषयात् आत्मनेपदं भवति | प्रयुङ्क्ते, उपयुङ्क्ते |

आहत्य अत्र कार्यं कीदृशमिति चेत्—
१) अपिति प्रत्यये परे **श्नसोरल्लोपः** (६.४.१११), **नश्चापदान्तस्य झलि** (८.३.२४), **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इति सूत्रसमूहः |
२) झलि परे **चोः कुः** (८.२.३०), **खरि च** (८.४.५५) |

अनेन कार्यं चतुर्विधम्—
१) पिति झलि = **चोः कुः** (८.२.३०), **खरि च** (८.४.५५)
२) पिति अझलि = न किमपि
३) अपिति झलि = सूत्रसमूहः + **चोः कुः** (८.२.३०), **खरि च** (८.४.५५)
४) अपिति अझलि = सूत्रसमूहः

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u> (परस्मैपदे, तदा आत्मनेपदे)
लटि —
लोटि—
लङि—
विधिलिङि—

एवमेव—
अञ्जू → अञ्ज् (परस्मैपदी, व्यक्तिम्रक्षण–कान्तिगतिषु = विवेचनं करोति, लेपयति)
भञ्जो → भञ्ज् (परस्मैपदी, आमर्दने = नष्टं करोति)
भुज → भुज् (उभयपदी, पालनाभ्यवहारयोः = पालनं करोति, संरक्षणं करोति; खादति)
अभ्यवहारः इत्युक्तौ भोजनम् | **भुजोऽनवने** (१.३.६६) इत्यनेन खादनार्थे आत्मनेपदं— भुङ्क्ते | पालने परस्मैपदं— नृपः राज्यं भुनक्ति |
ओविजी → विज् (परस्मैपदी, भयचलनयोः = भयेन कम्पते, आपद्ग्रस्तो भवति)
वृजी → वृज् (परस्मैपदी, वर्जने = वर्जयति, निवारयति, चिनोति)

**3.** <u>तकारान्ताः धातवः</u> (एकः धातुः कृती → कृत्)

<u>कृती → कृत्</u> (परस्मैपदी, वेष्टने= आवृणोति, परिवेष्टयति)

कृत् + श्नम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → कृनत्

a. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यम्

पित्सु = अङ्गकार्यं नास्ति | कृनत् + ति → कृणत्ति | कृनत् + आनि → कृणतानि |

अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः | कृनत् + तः → कृन्त् + तः → कृन्तः

b. सन्धिकार्यम्

कृन्त् + तः → **नश्चापदान्तस्य झलि** (८.३.२४) → कृंत् + तः → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → कृन्त् + तः → वर्णमेलने → कृन्तः

धेयं यत् अस्य क्रमस्य आरम्भे अन्ते च णत्वं स्यात् इति भाति | किन्तु **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन न भवति | आरम्भे शास्त्रासिद्धम्; अन्ते कार्यासिद्धम् |

१. आरम्भे शास्त्रासिद्धम्— कृन्त् + तः → अत्र **रषाभ्यां नो णः समानपदे** (८.४.१) इत्यनेन णत्वं स्यात्, परन्तु अत्र सूत्रद्वयस्य प्रसक्तिरस्ति— **नश्चापदान्तस्य झलि** (८.३.२४), **रषाभ्यां नो णः समानपदे** (८.४.१) च | त्रिपाद्यां समानकाले सूत्रद्वयस्य प्रसक्तिरस्ति चेत्, **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन परसूत्रम् असिद्धं भवति | अनयोः सूत्रयोर्मध्ये **रषाभ्यां नो णः समानपदे** परसूत्रम् अतः अत्र असिद्धं भवति | **नश्चापदान्तस्य झलि** इत्यनेन नकारस्य स्थाने अनुस्वारः | अनुस्वारे कृते, णत्वस्य प्रसक्तिर्नास्ति |

२. अन्ते कार्यासिद्धम्— कृंत् + तः → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → कृन्त् + तः → कृन्तः | अधुना कृन्तः इति रूपं दृष्ट्वा **रषाभ्यां नो णः समानपदे** इति सूत्रस्य प्रसक्तिः स्यात् इति भाति | परन्तु तस्मात् प्राक् **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यनेन नकारः आदिष्टः | अधुना **रषाभ्यां नो णः समानपदे** (८.४.१), इति सूत्रं प्रति **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) परसूत्रम् , अतः तस्य कार्यम् असिद्धम् | वस्तुतः कार्यं सञ्जातम् एव, परन्तु **रषाभ्यां** इत्यस्य दृष्ट्या न जातमेव; **रषाभ्यां** इति सूत्रेण कृंत्तः इत्येव दृश्यते न तु कृन्तः | अतः णत्वस्य अवसरः न भवति |

कृन्त् + हि → **हुझल्भ्यो हेर्धिः** → कृन्त् + धि → **नश्चापदान्तस्य झलि** (८.३.२४) → कृंत् + धि → **झलां जश् झशि** (८.४.५३) → कृंद् + धि → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → कृन्द् + धि → कृन्द्धि → **झरो झरि सवर्णे** (८.४.६५) इत्यनेन विकल्पेन झर्–लोपः → कृन्धि

**झरो झरि सवर्णे** (८.४.६५) = हल्–उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे | झरः षष्ठ्यन्तं, झरि सप्तम्यन्तं, सवर्णे सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **हलो यमां यमि लोपः** (८.४.६४) इत्यस्मात् **हलः**, **लोपः** चेत्यनयोः अनुवृत्तिः | **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्मात् **अन्यतरस्याम्** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **हलः झरः लोपः अन्यतरस्यां सवर्णे झरि संहितायाम्** |

यत्र यत्र **झरो झरि सवर्णे** (८.४.६५) इत्यस्य प्रसङ्गः स्यात्, तत्र तत्र अवश्यं प्रयोक्तव्यम् |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

**4.** <u>दकारान्ताः धातवः</u> (अष्टौ धातवः छिदिर् → छिद्, भिदिर् → भिद्, विद → विद्, उन्दी → उन्द्, खिद → खिद्, उच्छृदिर् → छृद्, उतृदिर् → तृद्, क्षुदिर् → क्षुद्)

<u>छिदिर् → छिद्</u> (उभयपदी, द्वैधीकरणे, अद्वैधस्य पृथक्त्वे= छिन्नं करोति; भिन्नं करोति)

छिद् + श्नम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → छिनद्

a. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यम्

पित्सु = अङ्गकार्यं नास्ति | छिनद् + ति → सन्धिकार्यम् → छिनत्ति | छिनद् + आनि → छिनदानि |
अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः | छिनद् + तः → छिन्द् + तः → सन्धिकार्यम् → छिन्तः

b. सन्धिकार्यम्

छिन्द् + तः → **नश्चापदान्तस्य झलि** (८.३.२४) → छिंद् + तः → **खरि च** (८.४.५५) → छिंत् + तः → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → छिन्त् + तः → वर्णमेलने → छिन्तः

एवं तकारान्तानां, दकारान्तानां, धकारान्तानां च धातूनां 'हल्–उत्तरस्य झर् सवर्णझरि परे' बहुत्र भवति इत्यस्मात् **झरो झरि सवर्णे** (८.४.६५) इत्यनेन यथासङ्गं झरः विकल्पेन लोपः |

लङि **लुङ्लङ्लृङ्क्ष्वड्उदात्तः** (६.४.७१) इत्यनेन अडागमः, तदा छकारे परे तुगागमः |

अ + छिनद् → **छे च** (६.१.७२) इत्यनेन तुगागमः → अत्छिनद् → **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन श्चुत्वादेशः → अच्छिनद्

**लुङ्लङ्लृङ्क्ष्वड्उदात्तः** (६.४.७१) = लुङ् लङ् लृङ् च परं चेत्, धातुरूपि–अङ्गस्य अट्–आगमो भवति; स च अडागमः उदात्त–संज्ञकः | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन अङ्गात् प्राक् आयाति | लुङ् च लङ् च लृङ् च तेषामितरेतरद्वन्द्वः लुङ्लङ्लृङः, तेषु लुङ्लङ्लृङ्क्षु | लुङ्लङ्लृङ्क्षु सप्तम्यन्तम्, अट् प्रथमान्तम्, उदात्तः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य अट् उदात्तः लुङ्लङ्लृङ्क्षु** |

**छे च** (६.१.७२) = ह्रस्वस्वरस्य तुक्–आगमो भवति छकारे परे | तुक् कित् अस्ति अतः **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन यस्य आगमः अस्ति (अत्र 'ह्रस्वस्वरस्य'), तस्य अन्ते आयाति | छे सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **ह्रस्वस्य पिति कृति तुक्** (६.१.७०) इत्यस्मात् **ह्रस्वस्य**, **तुक्** इत्यनयोः अनुवृत्तिः | **संहितायाम्** (६.१.७१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ह्रस्वस्य तुक् छे च संहितायाम्** |

लङि **दश्च** (८.२.७५) इत्यनेन सिपि परे धातोः पदान्ते दकारस्य विकल्पेन रु–आदेशः |

अच्छिनद् + स् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) इत्यनेन हल्–उत्तरस्य अपृक्तसंज्ञक–प्रत्ययस्य लोपः → अच्छिनद् → **वाऽवसाने** इत्यनेन विकल्पेन पदान्ते चर्–आदेशः → अच्छिनत् / अच्छिनद् | अच्छिनद् → **दश्च** (८.२.७५) इत्यनेन विकल्पेन रु–आदेशः → अच्छिनरु → उ इत्यस्य इत्–संज्ञा लोपश्च, **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यनेन अवसाने रेफस्य विसर्गादेशः → अच्छिनः | त्रीणि रूपाणि अच्छिनद् / अच्छिनत् / अच्छिनः

**दश्च** (८.२.७५) = धातोः पदान्ते दकारस्य स्थाने विकल्पेन रु–आदेशो भवति सिपि परे | रु–अभावे दत्वम् एव | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य (दकारस्य) एव स्थाने न तु पूर्णपदस्य | दः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **सिपि धातो रुर्वा** (८.२.७४) इत्यस्य पूर्णसूत्रस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **दः च पदस्य धातोः रुः वा सिपि** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—

लङि—
विधिलिङि—

एवमेव—
भिदिर् → भिद् (उभयपदी, विदारणे)
विद → विद् (आत्मनेपदी, विचारणे)
उन्दी → उन्द् (परस्मैपदी, क्लेदने)
खिद → खिद् (आत्मनेपदी, दैन्ये)
उच्छृदिर् → छृद् (उभयपदी, दीप्ति-देवनयोः)
उतृदिर् → तृद् (उभयपदी, हिंसा-नादरयोः)
क्षुदिर् → क्षुद् (उभयपदी, सम्पेषणे)

5. <u>धकारान्ताः धातवः</u> (द्वौ धातू रुधिर् → रुध्, ञिइन्धी → इन्ध्)

<u>रुधिर् → रुध्</u> (उभयपदी, आवरणे)

रुध् + श्रम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → रुनध्

a. तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यम्

पित्सु = अङ्गकार्यं नास्ति | रुनध् + ति → सन्धिकार्यम् → रुणद्धि | रुनध् + आनि → रुणधानि |
अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः | रुनध् + तः → रुन्ध् + तः → सन्धिकार्यम् → रुन्धः

b. सन्धिकार्यम्

रुन्ध् + तः → **झषस्तथोर्धोऽधः** (८.२.४०) → रुन्ध् + धः → **नश्चापदान्तस्य झलि** (८.३.२४) → रुंध् + धः → **झलां जश् झशि** (८.४.५३) → रुंद् + धः → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → रुन्द् + धः → **झरो झरि सवर्णे** (८.४.६५) → विकल्पेन द्-लोपः → वर्णमेलने → रुन्धः/रुन्द्धः

**झषस्तथोर्धोऽधः** (८.२.४०) = झष्-उत्तरस्य तकारथकारयोः स्थाने धकारादेशो भवति, धा-धातुं वर्जयित्वा | तस्च थ् च तथौ इतरेतरद्वन्द्वः; तयोः, तथोः | तकारोत्तर-अकारः उच्चारणार्थम् अस्ति; अग्रे 'धः' इत्यस्य धकारोत्तर-अकारः अपि तथ | न धा, अधा नञ्तत्पुरुषः, तस्मात् अधः | झषः पञ्चम्यन्तं, तथोः षष्ठ्यन्तं, धः प्रथमान्तम्, अधः पञ्चम्यन्तम्, अनेकपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **झषः तथोः धः अधः** |

लङि सिपि **झलां जशोऽन्ते** (८.२.३९) इत्यनेन पदान्ते झलः जश्त्वं, तदा **दश्च** (८.२.७५) इत्यनेन धातोः पदान्ते दकारस्य विकल्पेन रु-आदेशः | दकारान्तानाम् इव त्रीणि रूपाणि |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

एवमेव—

ञिइन्धी → इन्ध् (आत्मनेपदी, दीप्तौ)

**6.** <u>षकारान्ताः धातवः</u> (द्वौ धातू शिष्लृ → शिष्, पिष्लृ → पिष्)

शिष्लृ → शिष् (परस्मैपदी, विशेषणे)

शिष् + श्नम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → शिनष्

a. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यम्

पित्सु = अङ्गकार्यं नास्ति | शिनष् + ति → सन्धिकार्यम् → शिनष्टि | शिनष् + आनि → शिनषाणि |
अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः | शिनष् + तः → शिन्ष् + तः → सन्धिकार्यम् → शिंष्टः

b. सन्धिकार्यम्

शिनष् + ति → **ष्टुना ष्टुः** (८.४.४१) →

शिंष् + अन्ति → किमर्थं णत्वं न भवति इति चेत्, अस्य प्रक्रियायां **नश्चापदान्तस्य झलि** (८.३.२४), **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यनयोः कार्यम् अत्रापि भवति | यथा रुन्ध्–धातोः प्रसङ्गे, तथा | अत्र 'अन्ति' इत्यस्मिन् अपदान्तस्य नकारस्य अनुस्वारादेशः तु भवत्येव |

**ष्टुना ष्टुः** (८.४.४१) = दन्त्यसकारस्य तवर्गीयवर्णस्य च स्थाने मूर्धन्यषकारादेशः टवर्गीयवर्णादेशश्च भवतः, मूर्धन्यषकार–टवर्गीयवर्णयोः योजनेन |

शिनष् + सि → **षढोः कः सि** (८.२.४१) →

**षढोः कः सि** (८.२.४१) = सकारे परे षकारस्य ढकारस्य च ककारादेशो भवति | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **षढोः कः सि** |

शिनष् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१)

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

एवमेव—

पिष्लृ → पिष् (परस्मैपदी, संचूर्णने)

**7.** <u>सकारान्ताः धातवः</u> (एकः धातुः हिसि → हिंस्)

हिसि → हिंस् (परस्मैपदी, हिंसायाम्)

हिसि → **इदितो नुम् धातोः** (७.१.५८) → हिन्स् → **नश्चापदान्तस्य झलि** (८.३.२४) → हिंस् + श्नम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → हिनंस् → **श्नान्नलोपः** (६.४.२३) → हिनस्

(उपरितनायाः प्रक्रियायाः चर्चार्थम् अस्मिन् करपत्रे 'लबि अवस्रंसने' इत्यस्य यङ्लुगन्तधातुसिद्धेः लङ्-लकारप्रसङ्गे आलोचनं दृश्यताम् ।)

**इदितो नुम् धातोः** (७.१.५८) = इदितः धातोः नुम् आगमो भवति । इदित् इत्युक्ते इत् इत् यस्य सः । तत्र प्रथमः इत् नाम ह्रस्वः इकारः । द्वितीयः इत् नाम इत्-संज्ञा । ह्रस्व-इकारस्य इत्-संज्ञा यस्य, सः धातुः इदित् । इत् इत् यस्य स इदित् बहुव्रीहिः, तस्य इदितः । इदितः षष्ठ्यन्तं, नुम् प्रथमान्तं, धातोः षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् । सूत्रं स्वयं सम्पूर्णम्— **इदितः धातोः नुम्** ।

**श्नान्नलोपः** (६.४.२३) = श्नम्-प्रत्ययोत्तरस्य नकारस्य लोपो भवति । नस्य लोपो नलोपः, षष्ठीतत्पुरुषः । श्नात् पञ्चम्यन्तं, नलोपः प्रथमान्तं, द्विपदमिदं सूत्रम् । **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः । अनुवृत्ति-सहितसूत्रम्— **श्नात् अङ्गस्य नलोपः** ।

वस्तुतस्तु 'हिनस्' इति अङ्गस्य व्युत्पत्तिमार्गः अन्यरीत्या चिन्तनीयः यतोहि, यथा जानीमः, कस्यापि धातोः लौकिकरूपसिद्धिः वा अङ्गं वा एकाकिनि आकाशे न करणीयः । तदर्थमेव नोपधधातूनां धातुपाठे दन्त्यनकारः एव दर्शनीयः न तु सन्धिं कृत्वा ङकारो वा ञकारो वा इत्यादिकम् । प्रक्रियावशात् एव एतत्सर्वं भवेत् यतोहि सर्वत्र न भवति; यथासङ्गमेव परिस्थितिं दृष्ट्वा करणीयम् । एवमेव लबि-धातोः यङ्लुगन्तधातुः साधनीयः लङ्-लकारे । तथा च अत्र वास्तवी प्रक्रिया सन्दर्भमनुसृत्य एवं भवेत्—

हिसि → लट्-लकारस्य प्रथमपुरुषैकवचनविवक्षायां → हिसि + ति → **इदितो नुम् धातोः** (७.१.५८) → हिन्स् + ति → **कर्तरि शप्** (३.१.६८) इत्यनेन शप् → **रुधादिभ्यः श्नम्** (३.१.७८) इत्यनेन शपं प्रबाध्य श्नम् → हिन्स् + श्नम् + ति → **मिदचोऽन्त्यात्परः** (१.१.४७) → हिनन्स् + ति → **श्नान्नलोपः** (६.४.२३) → हिनस् + ति

एवञ्च यद्यपि **नश्चापदान्तस्य झलि** (८.३.२४) इत्यस्य प्रसक्तिरस्ति 'हिन्स् + ति' इति स्थितौ, परन्तु **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **कर्तरि शप्** (३.१.६८) इति सूत्रं प्रति त्रिपादिसूत्रं **नश्चापदान्तस्य झलि** (८.३.२४) असिद्धम् । अतः अस्यां प्रक्रियायाम् अनुस्वारादेशस्य कुत्रापि अवसरो न भवति । अन्ततो गत्वा **श्नान्नलोपः** (६.४.२३) इत्यनेन नकारलोपः ।

a. तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यम्

पित्सु = अङ्गकार्यं नास्ति । हिनस् + ति → हिनस्ति । हिनस् + आनि → हिनसानि ।
अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः । हिनस् + तः → हिन्स् + तः → सन्धिकार्यम् → हिंस्तः

b. सन्धिकार्यम्

**नश्चापदान्तस्य झलि** (८.३.२४) इत्येव । **खरि च** (८.४.५५) इत्यपि यथासङ्गं; फलं यथावत् । सकारः झलि चरि च ।

**खरि च** (८.४.५५) = झलः स्थाने चरादेशो भवति खरि परे । अनुवृत्ति-सहितसूत्रम्— **झलां चर् खरि च संहितायाम्** ।

<u>लोटि</u>

हि-स्थाने धि, तदा धकारादि-प्रत्यये परे, सकारान्तधातोः सकारस्य लोपः **धि च** (८.२.२५) इति सूत्रेण । इदं **झलां जश् झशि** (८.४.५३) इत्यस्य अपवादः ।

हिंस् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → हिंस् + धि → **धि च** (८.२.२५) इत्यनेन सकारलोपः → हिंधि → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यनेन परसवर्णादेशः → हिन्धि

**धि च** (८.२.२५) = सकारस्य लोपो भवति धकारादि–प्रत्यये परे | धि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **रात्सस्य** (८.२.२४) इत्यस्मात् **सस्य** इत्यस्य अनुवृत्तिः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **धि च सस्य लोपः** |

<u>लङि सकारान्तधातूनां तिपि सिपि च कार्यम्</u>

**तिप्यनस्तेः** (८.२.७३) इत्यनेन लङ्–लकारस्य तिपि परे सकारान्तपदस्य सकारस्य दकारादेशो भवति |

अहिनस् + त् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) इत्यनेन त्–लोपः → अहिनस् इति पदम् → **तिप्यनस्तेः** (८.२.७३) इत्यनेन पदान्ते सकारस्य दकारादेशः, तदा विकल्पेन चर्त्वम् → अहिनद् / अहिनत्

**तिप्यनस्तेः** (८.२.७३) = पदान्तस्य सकारस्य दकारादेशो भवति तिपि परे; परन्तु अस्–धातौ न भवति | इदं सूत्रं **ससजुषो रुः** (८.२.६६) इत्यस्य अपवादः | न अस्तिः अनस्तिः, तस्य अनस्तेः | तिपि सप्तम्यन्तम्, अनस्तेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **ससजुषोः रुः** (८.२.६६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **पदस्य सः दः तिपि अनस्तेः** |

**सिपि धातो रुर्वा** (८.२.७४) इत्यनेन लङ्–लकारस्य सिपि परे सकारान्तपदस्य सकारस्य स्थाने विकल्पेन दकारादेशः रुत्वं वा भवति |

अहिनस् + स् → स्–लोपः → अहिनस् → **सिपि धातो रुर्वा** इत्यनेन विकल्पेन रु–आदेशः → अहिनद् / अहिनरु → अहिनरु चेत् उ इत्यस्य इत्–संज्ञा लोपश्च, **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यनेन अवसाने रेफस्य विसर्गादेशः → अहिनः | आहत्य अहिनद् / अहिनत् / अहिनः |

**सिपि धातो रुर्वा** (८.२.७४) = पदान्तस्य सकारस्य रु–आदेशो भवति, दकारो वा, सिपि परे | अत्र 'वा' इति समुच्चयार्थे | **येनविधिस्तदन्तस्य** (१.१.७२ ) इत्यनेन तदन्तविधिः; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णादेशः | '**धातोः**' उक्तं परसूत्राणाम् अर्थपूर्तिकृते; प्रकृतसूत्रे आवश्यकता नास्ति | सिपि सप्तम्यन्तं, धातोः षष्ठ्यन्तं, रुः प्रथमान्तं, वा अव्ययपदम्, अनेकपदमिदं सूत्रम् | **ससजुषोः रुः** (८.२.६६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **सः धातोः पदस्य रुः दः वा सिपि** |

प्राचीनैः उच्यते यत् **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्त्या दकारस्य पक्षः सिध्यति साक्षात् अनेन एव **सिपि धातो रुर्वा** (८.२.७४) इति सूत्रेण | नवीनैः उच्यते यत् अस्यावश्यकता नास्ति यतोहि रु–अपक्षे स्–स्थाने दकारादेशः **झलां जशोऽन्ते** (८.२.३९) इत्यनेन | परन्तु अद्यत्वे आधिक्येन वैयाकरणाः वदन्ति यत् **ससजुषोः रुः** (८.२.६६), **झलां जशोऽन्ते** (८.२.३९) इत्यनयोर्मध्ये **ससजुषोः रुः** (८.२.६६) इत्यस्य अपवादभूतत्वात् **झलां जशोऽन्ते** (८.२.३९) इत्यस्य पुनः नितराम् अवकाशो नास्ति | इत्थञ्च **सिपि धातो रुर्वा** (८.२.७४) इत्यनेनैव रुश्च दश्च क्रियते |

(नवीनानां दृष्टिः एवम्— सकारान्तपदम् अस्ति चेत्, कीदृशं कार्यं स्यात् इति प्रश्नः | अस्मिन् प्रसङ्गे सर्वसामान्यं सूत्रं **झलां जशोऽन्ते** (८.२.३९) | सकारः झलि अस्ति; अनेन सूत्रेण पदान्ते सकारस्य जश्त्वं, नाम वर्गीयव्यञ्जनस्य तृतीयसदस्यः | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन दन्त्य–सकारस्य स्थाने दन्त्य–तवर्गस्य तृतीयसदस्यः दकारः भवति | अतः सर्वसामान्य–सिद्धान्तः पदान्ते सकारस्य स्थाने दकारादेशः | परन्तु **ससजुषो रुः** (८.२.६६) तस्य अपवादः | अनेन पदान्ते स्थितस्य सकारस्य स्थाने रु–आदेशो भवति | पुनः तिप्–प्रत्यये परे **तिप्यनस्तेः** (८.२.७३) तस्य अपवादः | अनेन तिपि परे पदान्तस्य सकारस्य दकारादेशो भवति | एवमेव सिप्–प्रत्यये परे **सिपि धातो रुर्वा** (८.२.७४), **ससजुषो रुः** (८.२.६६) इत्यस्य अपवादः | अनेन सिपि परे पदान्तस्य सकारस्य विकल्पेन रु–आदेशो भवति; तस्य अभावे सर्वसामान्यस्थितिः— **झलां जशोऽन्ते** (८.२.३९) इत्यनेन स्–स्थाने दकारः |)

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

8. <u>हकारान्ताः धातवः</u> (एकः धातुः तृह → तृह्)

तृह → तृह् (परस्मैपदी, हिंसायाम्)

तृह् + श्नम् → **मिदचोऽन्त्यात्परः** (१.१.४७) → तृनह्

a. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यम्

पित्सु = **तृणह इम्** (७.३.९२) इत्यनेन तृहः श्नमि कृते तृनह् इत्यङ्गस्य इम्–आगमो भवति हलादि–पित्–सार्वधातुक–प्रत्यये परे | तृनह् + ति → तृनह् + इम् + ति → इमः मित्त्वात् अन्त्यादचः परः → तृनेह् + ति → सन्धिकार्यम् → तृणेढि | तृनह् + आनि → अङ्गकार्यं नास्ति → सन्धिकार्यम् → तृणहानि |
अपित्सु = **श्नसोरल्लोपः** इत्यनेन श्नम् इत्यस्य अकारस्य लोपः | तृनह् + तः → तृन्ह् + तः → सन्धिकार्यम् → तृण्ढः

**तृणह इम्** (७.३.९२) = तृनह् इत्यङ्गस्य इम्–आगमो भवति हलादि–पित्–सार्वधातुक–प्रत्यये परे | **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन तदादिविधिः; अस्मात् '**हलि सार्वधातुके**' इत्युक्तौ हलादि–सार्वधातुके | तृणहः षष्ठ्यन्तम्, इम् प्रथमान्तं, द्विपदमिदं सूत्रम् | **श्नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **पिति**, **सार्वधातुके** इत्यनयोः आनुवृत्तिः | **वृद्धिर्लुके हलि** (७.३.८९) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **तृणहः अङ्गस्य इम् हलि पिति सार्वधातुके** |

b. सन्धिकार्यम्

तृनेह् + ति → **हो ढः** (८.२.३१) → तृनेढ् + ति → **झषस्तथोर्धोऽधः** (८.२.४०) → तृनेढ् + धि → **रषाभ्यां नो णः समानपदे** (८.४.१) → तृणेढ् + धि → **ष्टुना ष्टुः** (८.४.४१)→ तृणेढ् + ढि → **ढो ढे लोपः** (८.३.१३) → तृणे + ढि → तृणेढि

तृनह् + तः → **श्नसोरल्लोपः** (६.४.१११) → तृन्ह् + तः → **हो ढः** (८.२.३१) → तृन्ढ् + तः → **नश्चापदान्तस्य झलि** (८.३.२४) → तृंढ् + तः →

तृनेह् + सि → **हो ढः** (८.२.३१) → तृनेढ् + सि → **खरि च** (८.४.५५) प्रबाध्य **षढोः कः सि** (८.२.४१) → तृनेक् + सि → **आदेशप्रत्यययोः** (८.३.५९) → तृनेक्षि → **रषाभ्यां नो णः समानपदे** (८.४.१) → तृणेक्षि

अत्र 'तृनेह् + ति' इति प्रसङ्गे प्रश्नः उदेति, **ढो ढे लोपः** (८.३.१३) इत्यस्य दृष्ट्या **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **ष्टुना ष्टुः** (८.४.४१) इत्यस्य कार्यम् असिद्धं किल; तर्हि कथं वा **ढो ढे लोपः** (८.३.१३) इत्यस्य प्राप्तिः स्यात् ? उत्तरम् एवं यत् सम्पूर्णव्याकरणलोके **ढो ढे लोपः** (८.३.१३) इत्यस्य प्रसक्तिः केवलं **ष्टुना ष्टुः** (८.४.४१) इत्यस्य अनुसरणे, नान्यत्र | अतः अत्र न भवति चेत्, **ढो ढे लोपः** (८.३.१३) इति सूत्रं निरवकाशम् | तस्य निवारणार्थम् अत्र **ढो ढे लोपः** (८.३.१३), **पूर्वत्रासिद्धम्** (८.२.१) इत्यस्य अपवादः |

पुनः प्रश्नः, किमर्थं तर्हि **ढो ढे लोपः** (८.३.१३) अष्टाध्याय्यां **ष्टुना ष्टुः** (८.४.४१) इत्यस्य अनन्तरं न स्थापितम् ? यत्र अस्ति अधुना **ढो ढे लोपः** (८.३.१३) इत्यस्य न काऽपि अनुवृत्तिः अपेक्षिता— **ढो ढे लोपः** (८.३.१३) स्वयं सम्पूर्णम् | किन्तु तस्मात् परं यत् सूत्रं, **रो रि** (८.३.१४), तस्य 'लोपः' इति अनुवृत्तिः अपेक्षिता **ढो ढे लोपः** (८.३.१३) इत्यस्मात् | अपि च इमे द्वे सूत्रे

मिलित्वा एकं विषयसम्बद्धप्रकरणम् | **ढो ढे लोपः**, **रो रि लोपः**— यत्र एक एव वर्णः स्वस्मात् प्राक् चेत् लुप्तो भवति |

आहत्य अष्टाध्याय्यां किं सूत्रं कुत्र स्थापितम् इति विषये हेतुत्रयं वर्तते— (१) लाघवार्थम् अनुवृत्तिः, (२) विषयसम्बद्धप्रकरणम्, (३) पूर्वपरत्त्वात् बाध्यबाधकभावः | अत्र **ढो ढे लोपः** (८.३.१३) कुत्र स्थापितम् इति विषये, प्रथमं द्वीतीयं च कारणं प्राप्तं, तदर्थं त्रितीयं त्यक्तम् |

**हो ढः** (८.२.३१) = हकारस्य स्थाने ढकारादेशो भवति झलि पदान्ते च | हः षष्ठ्यन्तं, ढः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **हः ढः झलि पदस्य अन्ते च** |

**झषस्तथोर्धोऽधः** (८.२.४०) = झष्-उत्तरस्य तकारथकारयोः स्थाने धकारादेशो भवति, धा-धातुं वर्जयित्वा | तस्च थ् च तथौ इतरेतरद्वन्द्वः; तयोः, तथोः | तकारोत्तर-अकारः उच्चारणार्थम् अस्ति; अग्रे 'धः' इत्यस्य धकारोत्तर-अकारः अपि तथ | न धा, अधा नञ्तत्पुरुषः, तस्मात् अधः | झषः पञ्चम्यन्तं, तथोः षष्ठ्यन्तं, धः प्रथमान्तम्, अधः पञ्चम्यन्तम्, अनेकपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **झषः तथोः धः अधः** |

**ढो ढे लोपः** (८.३.१३) = ढकारे परे पूर्वतनस्य ढकारस्य लोपो भवति | ढः षष्ठ्यन्तं, ढे सप्तम्यन्तं, लोपः प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **ढः ढे लोपः** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

अभ्यासः

अधः सर्वे रुधादिगणीयाः धातवः अर्थसहिताः दत्ताः | लटि, लोटि, लङि, विधिलिङि च वाक्यानि रचनीयानि |

विचिर् → विच् (उभयपदी, पृथग्भावे = पृथक् करोति, विलक्षयते)
तञ्चू → तञ्च् (परस्मैपदी, सङ्कोचने = स्ङ्कुचितः भवति)
रिचिर् → रिच् (उभयपदी, विरेचने = त्यजति, मोचयति, रिक्तं करोति)
पृची → पृच् (परस्मैपदी, सम्पर्के = संयोजयति)
युजिर् → युज् (उभयपदी, योगे = संयोजनं करोति)
अञ्जू → अञ्ज् (परस्मैपदी, व्यक्तिम्रक्षण-कान्तिगतिषु = विवेचनं करोति, लेपयति)
भञ्जो → भञ्ज् (परस्मैपदी, आमर्दने = नष्टं करोति)
भुज → भुज् (उभयपदी, पालनाभ्यवहारयोः = पालनं करोति, संरक्षणं करोति; खादति)
अभ्यवहारः इत्युक्तौ भोजनम् | **भुजोऽनवने** (१.३.६६) इत्यनेन खादनार्थे आत्मनेपदं— भुङ्क्ते | पालने परस्मैपदं— नृपः राज्यं भुनक्ति |
ओविजी → विज् (परस्मैपदी, भयचलनयोः = भयेन कम्पते, आपद्ग्रस्तो भवति)
वृजी → वृज् (परस्मैपदी, वर्जने = वर्जयति, निवारयति, चिनोति)
कृती → कृत् (परस्मैपदी, वेष्टने= आवृणोति, परिवेष्टयति)
छिदिर् → छिद् (उभयपदी, द्वैधीकरणे, अद्वैधस्य पृथक्त्वे= छिन्नं करोति; भिन्नं करोति)
भिदिर् → भिद् (उभयपदी, विदारणे= भग्नं करोति; नशति)
विद → विद् (आत्मनेपदी, विचारणे= विचारयति, मननं करोति)

उन्दी → उन्द् (परस्मैपदी, क्लेदने= आर्द्रं करोति)
खिद → खिद् (आत्मनेपदी, दैन्ये= खिन्नः भवति)
उच्छृदिर् → छृद् (उभयपदी, दीप्ति–देवनयोः= प्रकाशते, शोभते)
उतृदिर् → तृद् (उभयपदी, हिंसा–नादरयोः= मारयति, दुःखं प्रापयति)
क्षुदिर् → क्षुद् (उभयपदी, सम्पेषणे= पेषयति, चूर्णयति)
रुधिर् → रुध् (उभयपदी, आवरणे= बाधते, वारयति)
ञिइन्धी → इन्ध् (आत्मनेपदी, दीप्तौ= प्रदीप्तः भवति, प्रकाशितः भवति, ज्वलति | अकर्मकधातुः)
शिष्लृ → शिष् (परस्मैपदी, विशेषणे= विलक्षयति, पृथक् करोति)
पिष्लृ → पिष् (परस्मैपदी, संचूर्णने= पेषयति, चूर्णयति
हिसि → हिंस् (परस्मैपदी, हिंसायाम्= प्रहरति, दुःखं प्रापयति)
तृह → तृह् (परस्मैपदी, हिंसायाम्= मारयति)

इति रुधादिगणे समग्रं तिङ्–सम्बद्धं सार्वधातुकप्रकरण–चिन्तनं समाप्तम् |

Swarup – December 2013 (Updated December 2016)